শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে কিষ্কিন্ধাকাণ্ডে

# ॥ ষটিত্রিংশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ ষটিত্রিংশঃ সর্গঃ ॥

## স্ত্বীযং লঘুৎৱং শ্রীরামস্য মহত্ত্বং চ প্রতিপাদযতা সুগ্রীৱেণ লক্ষ্মণং প্রতি ক্ষমাযাঃ প্রার্থনং লক্ষ্মণেন তস্য প্রশংসাপূর্ৱকং তং প্রত্যাত্মনা সহ চলিতুমাদেশকরণম্

ইত্যুক্তস্তারযা ৱাক্যং প্রশ্রিতং ধর্মসংহিতম্।
মৃদুস্ৱভাৱঃ সৌমিত্রিঃ প্রতিজগ্রাহ তদ্ৱচঃ ॥ **4.36.1** ॥

তস্মিন্ প্রতিগৃহীতে তু ৱাক্যে হরিগণেশ্ৱরঃ।
লক্ষ্মণাৎ সুমহত্ত্রাসং ৱস্ত্রং ক্লিন্নমিৱাত্যজৎ ॥ **4.36.2** ॥

ততঃ কণ্ঠগতং মাল্যং চিত্রং বহুগুণং মহৎ।
চিচ্ছেদ ৱিমদশ্চাসীৎ সুগ্রীৱো ৱানরেশ্ৱরঃ ॥ **4.36.3** ॥

স লক্ষ্মণং ভীমবলং সর্ৱৱানরসত্তমঃ।
অব্রৱীৎ প্রশ্রিতং ৱাক্যং সুগ্রীৱঃ সম্প্রহর্ষযন্ ॥ **4.36.4** ॥

প্রণষ্টা শ্রীশ্চ কীর্তিশ্চ কপিরাজ্যং চ শাশ্ৱতম্।
রামপ্রসাদাৎ সৌমিত্রে পুনশ্চাপ্তমিদং মযা ॥ **4.36.5** ॥

কঃ শক্তস্তস্য দেৱস্য খ্যাতস্য স্ৱেন কর্মণা।
তাদৃশং প্রতিকুর্ৱীত অংশেনাপি নৃপাত্মজ ॥ **4.36.6** ॥

সীতাং প্রাপ্স্যতি ধর্মাত্মা ৱধিষ্যতি চ রাৱণম্।
সহাযমাত্রেণ মযা রাঘৱঃ স্ৱেন তেজসা ॥ **4.36.7** ॥

সহাযকৃত্যং কিং তস্য যেন সপ্ত মহাদ্রুমাঃ।
গিরিশ্চ ৱসুধা চৈৱ বাণেনৈকেন দারিতাঃ॥ **4.36.8**॥

ধনুর্ৱিস্ফারমাণস্য যস্য শব্দেন লক্ষ্মণ।
সশৈলা কম্পিতা ভূমিঃ সহাযৈঃ কিং নু তস্য ৱৈ॥ **4.36.9**॥

অনুযাত্রাং নরেন্দ্রস্য করিষ্যেঽহং নরর্ষভ।
গচ্ছতো রাৱণং হন্তুং ৱৈরিণং সপুরস্সরম্॥ **4.36.10**॥

যদি কিঞ্চিদতিক্রান্তং ৱিশ্ৱাসাৎ প্রণযেন ৱা।
প্রেষ্যস্য ক্ষমিতৱ্যং মে ন কশ্চিন্নাপরাধ্যতি॥ **4.36.11**॥

ইতি তস্য ব্রুৱাণস্য সুগ্রীৱস্য মহাত্মনঃ।
অভৱল্লক্ষ্মণঃ প্রীতঃ প্রেম্ণা চেদমুৱাচ হ॥ **4.36.12**॥

সর্ৱথা হি মম ভ্রাতা সনাথো ৱানরেশ্ৱর।
ৎৱযা নাথেন সুগ্রীৱ প্রশ্রিতেন ৱিশেষতঃ॥ **4.36.13**॥

যস্তে প্রভাৱঃ সুগ্রীৱ যচ্চ তে শৌচমীদৃশম্।
অর্হস্ত্ৱং কপিরাজ্যস্য শ্রিযং ভোক্তুমনুত্তমাম্॥ **4.36.14**॥

সহাযেন চ সুগ্রীৱ ৎৱযা রামঃ প্রতাপৱান্।
ৱধিষ্যতি রণে শত্রূনচিরান্নাত্র সংশযঃ॥ **4.36.15**॥

ধর্মজ্ঞস্য কৃতজ্ঞস্য সঙ্গ্রামেষ্ৱনিৱর্তিনঃ।
উপপন্নং চ যুক্তং চ সুগ্রীৱ তৱ ভাষিতম্॥ **4.36.16**॥

দোষজ্ঞঃ সতি সামর্থ্যে কোঽন্যো ভাষিতুমর্হতি।
ৱর্জযিৎৱা মম জ্যেষ্ঠং ৎৱাং চ ৱানরসত্তম॥ **4.36.17**॥

সদৃশশ্চাসি রামেণ ৱিক্রমেণ বলেন চ।
সহাযো দৈৱতৈর্দত্তশ্চিরায হরিপুঙ্গৱ॥ **4.36.18**॥

কিং তু শীঘ্রমিতো ৱীর নিষ্ক্রম ৎৱং মযা সহ।
সান্ত্বযস্ৱ ৱযস্যং চ ভার্যাহরণদুঃখিতম্॥ **4.36.19** ॥

যচ্চ শোকাভিভূতস্য শ্রুৎৱা রামস্য ভাষিতম্।
মযা ৎৱং পরুষাণ্যুক্তস্তৎ ক্ষমস্ৱ সখে মম॥ **4.36.20** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে
কিষ্কিন্ধাকাণ্ডে ষটিত্রিংশঃ সর্গঃ ॥